# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-२(SEM-4) | **प्रश्नपत्रम् - ४** | **गुणाः** - ७० |
| **विषयः** - साहित्यम् (काव्यवर्गः) | **कोड- CC- 5412(3)** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - ०२/०४/२०१९ | **सन्दर्भग्रन्थः**- नैषधीयचरितम्। सर्गौ ४-५ | |

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ एकस्य ससन्दर्भं व्याख्या कार्या ।** ०५

१. निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम्।
मृदुतनोर्वितनोतु कथं न तामवनिभृत्तु निविश्य हृदि स्थितः ॥

२. दहनजा न पृथुर्दवथुव्यथा विरहजैव पृथुर्यदि नेदृशम्।
दहनमाशु विशन्ति कथं स्त्रियः प्रियमपांसुमुपासितुमुद्धुराः ॥

**प्रश्नः २ महाकाव्यस्य ( नायक- )नल-( नायिकयोः )-दमयन्त्योः विरहव्यथा विविच्यताम् ।** १०

अथवा

**चतुर्थसर्गस्य कथानकं प्रतिपादनीयम् ।**

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ एकस्य ससन्दर्भं व्याख्या कार्या ।** ०५

१. हृदयमाश्रयसे बत मानकं ज्वलयसीत्थमनङ्ग! तदेव किम्?
स्वयमपि क्षणदग्धनिजेन्धनः क्व भवितासि? हताश! हुताशवत् ॥

२. द्रुतविगमितविप्रयोगचिह्नामपितनयां नृपतिः पदप्रणम्राम्।
अकलयदसमाशुगाधिमग्नां झटिति पराशयवेदिनो हि विज्ञाः ॥

**प्रश्नः ४ राज्ञो नलस्य चरितं नैषधीयचरितस्य नियतांशानुसारं वर्ण्यताम् ।** १०

अथवा

**"नैषधं विद्वदौषधम्" इति विवेचनीयम् ।**

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ एकस्य ससन्दर्भं समन्वयः साधनीयः ।** ०५

१. एवमुक्तवति देवऋषीन्द्रे द्रागभेदि मघवाननमुद्रा ।
उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ॥

२. चित्रमत्र विबुधैरपि यत्तैः स्वर्विहाय बत भूरनुसस्रे ।
द्यौर्न काचिदथवाऽस्ति निरूढा, सैव सा चरति यत्र हि चित्तम् ॥

**प्रश्नः ६ नारदेन्द्रसंवादः स्वसंस्कृतेन लेख्यः ।** १०

अथवा

**नारदस्य पात्रालेखनं कुरुत ।**

## ॥ चतुर्थान्वितिः ॥ (Unit-4)

**प्रश्नः ७ एकस्य ससन्दर्भं समन्वयः साधनीयः ।** **०५**

१. मा धनानि कृपणः खलु जीवस्तृष्णयाऽर्पयतु जातु परस्मै ।
तत्र नैष कुरुते मम चित्रं यत्तु नार्पयति तानि मृतोऽपि ॥

२. तेन तेन वचसैव मघोनः स स्म वेद कपटं पटुरुच्चैः ।
आचरत्तदुचितामथ वाणीमार्जवं हि कुटिलेषु न नीतिः ॥

**प्रश्नः ८ दमयन्त्याः चरितं नैषधीयचरितस्य नियतांशानुसारं वर्णनीयम् ।** **१०**

अथवा

**पञ्चमसर्गस्य उत्तरार्धस्य कथानकं विविच्यताम् ।**

**प्रश्नः ९ निम्नलिखितेभ्यः दशप्रश्नानाम् अतिलघूत्तराणि यच्छत ।** **१०**

१. भीमनरेन्द्रनन्दना का?
२. नैषधीयचरिते कति सर्गाः सन्ति?
३. चतुर्थसर्गारम्भे किं छन्दः प्रयुक्तमस्ति?
४. स्मरः रत्यां कं सृजति?
५. पदे पदे के सन्ति?
६. तव वर्त्मनि किं वर्तताम्?
७. भीमनृपतेः नगरस्य किं नामासीत्?
८. नैषधीयचरितस्य चतुर्थसर्गे कानि कानि छन्दांसि प्रयुक्तानि?
९. नारदः किमर्थं त्रिदशधाम जगाम?
१०. कः महसां राशिः महोज्ज्वल आसीत्?
११. नैषधीयचरिते प्रधानरसः कोऽस्ति?
१२. नलस्य वपुः किमालिङ्गयत्?
१३. विदर्भभूः द्यां किमर्थं हसति?
१४. हंसः दमयन्त्या कथं न धार्यः?
१५. नलस्य दृशा किं तर्जितम्?

०००